ञ्झाकम्पितकुड्मले कुरवके निर्वाप्य वन्यद्विपैः" ॥ तस्य पुष्पादिरपि । यथा कुमारटीकायां मल्लिनाथः । "आलोकितः कुरवकः कुरुते विकाशम्" ॥ अस्य पर्य्याया लक्षणञ्च यथा ॥

"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका ।
सहाचरः सहचरः स च भिन्द्यपि कथ्यते ।
कुरण्टकोऽत्र पीते स्याद्रक्ते कुरवकः स्मृतः" ॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) कुत्सितरवे त्रि ॥

कुरसः, पुं, (कुत्सितो रसो यत्र ।) मद्यभेदः । इति हारावली ॥ कर्म्मधारये कुत्सितरसः । बहुव्रीहौ कुत्सितरसयुक्ते त्रि ॥

कुरसा, स्त्री, (कुत्सितः ईषत् वा रसो यस्याः ।) गोजिह्वा लता । इति शब्दचन्द्रिका ॥

कुराहः, पुं, कुलाहः । ईषत्पाण्डुः कृष्णजङ्घो घोटकः । इति हेमचन्द्रः ॥

कुरी, स्त्री, (कुं भूमिं राति ददाति । कु + रा + कः । ततो गौरादित्वात् ङीष् ।) तृणधान्यभेदः । इति राजनिर्घण्टः ॥

कुरीरं, क्ली, ("कृञ उच्च" । उणां ४ । ३३ । इति ईरन् उकारादेशश्च ।) मैथुनम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कुरुः, पुं, (कृ + "कृग्रोरुच्च" । उणां १ । २५ । इति कुः उच्च ।) आग्नीध्रराजपुत्त्रः । स तु प्रियव्रतराजपौत्त्रः । (स्वायम्भुवमनोः प्रपौत्त्रः उत्तरकुरुराज्यं प्राप्तवांश्च । तत्रत्या नदी च भद्रेति नाम्ना विश्रुता । यथा विष्णुपुराणे । २ । १ । १६-२२ ।

"जम्बुद्वीपेश्वरो यस्तु आग्नीध्रो मुनिसत्तम ! ।
तस्य पुत्त्रा बभूवुस्ते प्रजापतिसमा नव ॥
नाभिः किम्पुरुषश्चैव हरिवर्ष इलावृतः ।
रम्यो हिरण्वान् षष्ठश्च कुरुर्भद्राश्व एव च ॥
केतुमालस्तथैवान्यः साधुचेष्टो नृपोऽभवत् ।
जम्बुद्वीपविभागांश्च तेषां विप्र ! निशामय ॥
पित्रा दत्तं हिमाह्वन्तु वर्षं नाभेस्तु दक्षिणम् ।
हेमकूटं तथा वर्षं ददौ किम्पुरुषाय सः ॥
तृतीयं नैषधं वर्षं हरिवर्षाय दत्तवान् ।
इलावृताय प्रददौ मेरुर्यत्र तु मध्यगः ॥
नीलाचलाश्रितं वर्षं रम्याय प्रददौ पिता ।
श्वेतं तदुत्तरं वर्षं पित्रा दत्तं हिरण्वते ॥
यदुत्तरं शृङ्गवतो वर्षं तत्कुरवे ददौ ।
मेरोः पूर्ब्बेण यद्वर्षं भद्राश्वाय प्रदत्तवान्" ॥

वैवस्वतमनुवंश्यचन्द्रवंशीयराजविशेषः । स तु सम्वरणराजभार्य्यायां सूर्य्यकन्यायां तपत्यां जातः । अयमेव कुरुक्षेत्रपतिः । धार्त्तराष्ट्रपाण्डवानां पूर्ब्बपुरुषः । यथा,—

"योऽजमीढ़स्ततश्चन्द्र ऋक्षः सम्वरणस्ततः ।
तपत्यां सूर्य्यकन्यायां कुरुक्षेत्रपतिः कुरुः ॥
परीक्षित् सुधनुर्जह्नुर्निषधाश्वः कुरोः सुताः" ॥

इति श्रीभागवते । ९ । २२ । ४ ।) भक्तम् । देशविशेषः । इति मेदिनी ॥ स तु जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः । इति ज्योतिषम् ॥ तद्देशवासी । तत्र बहुवचनान्तः । (यथा गीतायाम् १ । २५ । "उवाच पार्थ ! पश्यैतान् समवेतान् कुरूनिति" ॥) कण्टकारिका । इति शब्दचन्द्रिका ॥

कुरुकन्दकं, क्ली, (कुरुः इव विस्तीर्णः कन्दो यस्य । कप् ।) मूलकम् । इति शब्दमाला ॥

कुरुक्षेत्रं, क्ली, (कुरुणा चन्द्रवंशोद्भवेन राजविशेषेण भूरितपसोपार्ज्जितं धर्म्मक्षेत्रनाम्ना प्रसिद्धं कुरुदेशान्तर्गतं क्षेत्रम् । शाकपार्थिवादित्वात् मध्यपदलोपः ।) देशविशेषः । तत्तु धर्म्मक्षेत्रम् । (किञ्चास्मिन्नेव क्षेत्रे क्षत्त्रियकुलारण्यकुठारेण भृगुवंशधुरन्धरेण भगवता जामदग्न्यरामेण क्षत्त्रियशोणितैः पञ्च ह्रदाः कृताः तदारभ्य च क्षेत्रमेतत् समन्तपञ्चकनाम्नोच्यते । नितरामेवात्र युध्यतां क्षत्त्रियाणां शरीरविसर्ज्जनेन पुण्यप्राचुर्य्यात् वैकुण्ठप्राप्तिः । तत एवात्र कुरुपाण्डवानां समरयुद्धं निर्वृत्तम् । एतद्विवरणं महाभारतीये १२ । ४८ अध्याये श्रीकृष्णयुधिष्ठिरसंवादे द्रष्टव्यम् ॥ यथा भगवद्गीतायाम् १ । १ ।

"धर्म्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्व्वत सञ्जय !" ॥

एतत्क्षेत्रस्य सीमानिर्द्देशे बहूनि मतानि लभ्यन्ते दिङ्मात्रमुदाहृतमत्र । यथा, हेमचन्द्रः ।

"धर्म्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधि" ॥

तथा त्रिकाण्डशेषेऽपि ।

"कुरुक्षेत्रं प्रयागश्च हिमाद्रिं विन्ध्यमन्तरा" ॥

एष हि ब्रह्मर्षिदेशः । यथा, मनौ । २ । १९ ।

"कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः ।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः" ॥)

कुरुक्षेत्रीयोगः, पुं, एकस्मिन् सावनदिने तिथित्रयनक्षत्रत्रययोगत्रयात्मकः स्पर्शः । इति स्मृतिः ॥ कुरुक्षेत्रे मृत्युयोगः । यथा,—

"पञ्चग्रहयुते मृत्यौ लग्नसंस्थे बृहस्पतौ ।
सौम्यक्षेत्रगते लग्ने कुरुक्षेत्रे मृतिर्भवेत्" ॥

इति जातकामृतसंग्रहे योगाध्यायः ॥

कुरुटः, पुं, (कुत्सितं रोटते दीप्यते प्रतिहन्ति वा । रुट दीप्तौ प्रतिघातादिषु च + "इगुपधेति" ३ । १ । १३५ । कः ।) सितावरशाकः । इति राजनिर्घण्टः ॥

कुरुण्टः, पुं, (कुत्सितं दुर्गन्धादिकं रुण्टति लुण्ठतीति । कु + रुटि स्तेये + अच् ।) पीतझिण्टी । पीताम्लानः । इति मेदिनी ॥ (कुरुण्टकशब्देऽस्य विवृतिर्ज्ञेया ॥)

कुरुण्टकः, पुं, (कुरुण्ट + स्वार्थे कन् ।) पीताम्लानः । पीतझिण्टी । तत्पर्य्यायः । सहचरी २ सहचरः ३ । इत्यमरः । २ । ४ । ७५ ॥ सहाचरः ४ कुरण्टकः । इति भरतः ॥ ("पीतः सहचरः पीतपुष्पो दासीकुरुण्टकः" । इति वैद्यकरत्नमालायाम् । यथास्य व्यवहारस्तथा, सुश्रुते सूत्रस्थाने ३८ अध्याये आरग्वधादिवर्गे । "आरग्वधमदनगोपघोण्टा कुटजपाठा कण्टकीपाटलामूर्व्वेन्द्रयवसप्तपर्णनिम्बकुरुण्टकदासीत्यादिषु द्रष्टव्यः ॥)

कुरुण्टी, स्त्री, (कु कुत्सितं रुण्टति स्तभ्नाति । कु + रुटि + अच् । गौरादित्वात् ङीष् ।) दारुपुत्तलिका । इति मेदिनी ॥ (कु कुत्सितं पापं रुण्टति नाशयति ब्राह्मणः पत्युर्वा परिचर्य्यया ।) ब्राह्मणी । इति जटाधरः ॥

कुरुम्बं, क्ली, (कुर् + बाहुलकात् उम्बच् ।) कूलपालकम् । इति शब्दचन्द्रिका ॥ कमलालेबु इति भाषा ॥

कुरुम्बा, स्त्री, (कुरुम्ब + स्त्रियां टाप् ।) द्रोणपुष्पी । इति राजनिर्घण्टः ॥ (द्रोणपुष्पीशब्देऽस्या गुणादयो ज्ञेयाः ॥)

कुरुम्बिका, स्त्री, (कुरुम्बा + स्वार्थे कः टाप् इत्वं च ।) द्रोणपुष्पी । इति राजनिर्घण्टः ॥

कुरुम्बी, स्त्री, (कुरुम्ब + स्त्रियां गौरादित्वात् ङीष् ।) सैंहलीवृक्षः । इति राजनिर्घण्टः ॥

कुरुराट् [ ज् ] पुं, (कुरुषु राजते । राज् + क्विप् ।) दुर्य्योधनः । इति त्रिकाण्डशेषः ॥

कुरुलः, पुं, (कुर् + उलक् ।) भालस्थितचूर्णकुन्तलः । तत्पर्य्यायः । भ्रमरकः २ भ्रमरालकः ३ । इति हेमचन्द्रः ॥

कुरुवकः, पुं, (रौतीति रुवो भ्रमरः । कुत्सितः स्वल्पमधुलाभात् विरक्तो रुवो यत्र । स्वल्पमधुत्वादस्य तथात्वम् ।) रक्तझिण्टी । रक्ताम्लानः । इत्यमरः । २ । ४ । ७४ ॥ पीतझिण्टी । इति हेमचन्द्रः ॥ (कुरवकशब्दे पीतझिण्टीशब्दे च अस्य विवृतिर्ज्ञातव्या ॥)

कुरुविन्दं, क्ली, (कुरून् विन्दति + विद्लाभे "अनुपसर्गात् लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च" । ३ । १ । १३८ । इति शः मुचादित्वात् नुम् च ।) काचलवणम् । माणिक्यम् । इति राजनिर्घण्टः ॥ कुरुविल्वरत्नम् । कुल्माषशस्यम् । इति मेदिनी ॥ (क्वचिदस्य पुंलिङ्गत्वमपि दृश्यते । यथा, सुश्रुते सूत्रस्थाने ३६ अः ।

"कासीससैन्धवं किण्वं कुरुविन्दो मनःशिला" ॥)

कुरुविन्दः, पुं, (कुरु + विद् + शः नुम् च ।) मुस्तकम् । इत्यमरः । २ । ४ । १५९ ॥ माषः । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—

"मुस्तकं न स्त्रियां मुस्तं त्रिषु वारिदनामकम् ।
कुरुविन्दश्च सङ्ख्यातोऽपरः क्रोड़कसेरुकः ।
भद्रमुस्तश्च गुन्द्रा च तथा नागरमुस्तकः" ॥

इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

कुरुविल्वः, पुं, (कुरुषु विल्व इव ।) पद्मरागमणिः । इति त्रिकाण्डशेषः ॥

कुरुविल्वकः, पुं, (कुरुविल्व + संज्ञायां कन् ।) कुल्माषः । वनकुलत्थिका । इति रत्नमाला ॥ (गुणाश्चास्य कुल्माषशब्दे ज्ञेयाः ॥)

कुरुविस्तः, पुं, (कुरुषु विख्यातः विस्तः ।) स्वर्णपलम् । इत्यमरः । २ । ९ । ८६ ॥ चारि तोला सोना । इति भाषा ॥

कुरूप्यं, क्ली, (कु ईषत् रूप्यमिव । रूप्यवत् शुभ्रत्वात्तथात्वम् ।) रङ्गम् । इति राजनिर्घण्टः ॥

कुर्कुरः, पुं स्त्री, (कुर् इत्यस्फुटं शब्दं कुरति शब्दायते । कुर् + कुर् + कः ।) कुक्कुरः । इत्यमरटीकायां रायमुकुटः ॥

कुर्णजः, पुं, कुलञ्जनवृक्षः । इति राजनिर्घण्टः ॥